मर्म्मवित्, [द्] पुं, (मर्म्म वेत्तीति । विद् + क्विप् ।) मर्म्मज्ञ: । तत्पर्य्याय: । कार्पटिक: २ । इति त्रिकाण्डशेष: ॥ मार्म्मिक: ३ मर्म्मवेदी ४ । इति जटाधर: ॥ (यथा, कथासरित्सागरे । ६२ । ६० ।
"वक्रनासस्ततोऽवादीदस्त्योऽयं परमर्म्मवित् ॥")

मर्म्मवेदी, [न्] पुं, (मर्म्म वेत्तीति । विद् + णिनि: ।) मर्म्मवित् । तत्त्वज्ञ: । इति जटाधर: ॥

मर्म्मस्पृक्, [श्] त्रि, (मर्म्म स्पृशतीति । स्पृश् + "स्पृशोऽनुदके क्विन् ।" ३ । २ । ५८ । इति क्विन् ।) मर्म्मपीड़क: । तत्पर्य्याय: । अरुन्तुद: २ । इत्यमर: । ३ । १ । ८३ ॥ व्यथक: ३ । इति हेमचन्द्र: । ६ । १६५ ॥

मर्म्माविध्, मर्म्माविद् } [ध्] त्रि, (मर्म्म विध्यतीति । मर्म्म + व्यध् + क्विप् । "ग्रहिज्येति ।" ६ । १ । १६ । इति सम्प्रसारणम् । "नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।" ६।३।११६ । इति दीर्घत्वम् ।) सन्धिस्थानवेधकर्त्ता । मर्म्मज्ञ: । यथा, भट्टिकाव्ये । ५ । ५२ ।
"चिरं क्लिशित्वा मर्म्माविद्रामो विलुभितप्लवम् ।
शब्दायमानमव्यक्तोद्भयदं चञ्चराचरम् ॥"
"मर्म्माणि विध्यतीति क्विप् नि: वीरुद्धो धङ्काविति दीर्घनिर्द्देशात् क्वचित् क्विबन्ते पूर्व्वपददीर्घत्वं स्यादिति सूचितं आङ्पूर्व्वस्य रूपं वा मर्म्माचित् मर्म्मज्ञो वा वेत्ति रूपम् ।" इति तट्टीकायां भरत: ॥

मार्म्मिक:, त्रि, (मर्म्म वेत्तीति । मर्म्म + ठक् ।) मर्म्मवित् । इति जटाधर: ॥

मर्य्या, स्त्री, (म्रियतेऽवशिष्यतेऽत्र । मृ + यत् । टाप् ।) सीमा । इति मर्य्यादाशब्दटीकायां रायमुकुट: ॥

मर्य्यादक:, त्रि, मर्य्यादाकर्त्ता । मर्य्यादां करोतीति कर्त्तरि ण्वुल् कादिति कप्रत्यये केऽक: स्त्री हेतु वेति आकारस्य ह्रस्वे निष्पन्नोऽयं शब्द: ॥

मर्य्यादा, स्त्री, (मर्य्या + दा + अङ् । न्याय्यपथस्थिति: । (यथा, महाभारते । १५ ।२२।२५ ।
"मर्य्यादायां स्थितो धर्म्म: शमश्चैवास्य लक्षणम् ॥")
तत्पर्य्याय: । संस्था २ धारणा ३ स्थिति: ४ । इत्यमर: । २ । ८ । २६ ॥ "पर्य्यादीयते मर्य्यादा पर्य्याङ्पूर्व्वात् दाञो ड: निपातनात् पस्य म: ।" इति तट्टीकायां भरत: ॥ "मर्य्येति सीमार्थे अव्ययं तत्र दीयते मर्य्यादेति स्वामी ।" इति रायमुकुट: ॥ "म्रियन्तेऽत्रेति मर्य्या तां ददातीति मर्य्यादा ।" इति सारसुन्दरी ॥ सीमा । इति जटाधर: ॥ कूलम् । इति हेमचन्द्र: । ४ । १४३ ॥ (यथा, प्रबोधचन्द्रोदये । १ । ६ ।
"कल्पान्तवातसंक्षोभलङ्घिताशेषभूभृत: ।
स्थैर्य्यप्रसादमर्य्यादास्ता एव हि महोदधे: ॥"
देवातिथे: पत्नी । यथा, महाभारते । १ । ९५ । २३ । [नाम ॥")
"देवातिथि: खलु वैदेहीमुपयेमे मर्य्यादां

मर्य्यादागिरि: पुं, (मर्य्यादा सीमा तज्ज्ञापको गिरि: ।) कुलाचल: । वर्षसीमापर्व्वत: । यथा ।
"उत्तरोत्तरेणेलावृतं नील: श्वेत: शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरय: प्रागायता: । उभयत: क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकश: पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति । एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादय: । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम् । तथैवेलावृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतु: केतुमालभद्राश्वयो: सीमानं विदधाते ।" इति श्रीभागवते ५ स्कन्धे १६ अध्याय: ॥

मर्व्व, पूर्त्तौ । गतौ । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् ।) मर्व्वति पयसा कुम्भं चेटी । इति दुर्गादास: ॥

मर्ष, पुं, क्षान्ति: । मृषधातोर्भावे घञ्प्रत्ययेन निष्पन्न: ॥ (यथा, किरातार्ज्जुनीये । १ । ३३ ।
"अ-मर्षशून्येन जनस्य जन्तुना
न जातहार्द्देन न विद्विषादर: ॥")

मर्षणं, क्ली, (मृष् + ल्युट्) क्षमा । मृषधातोर्भावे अनट्प्रत्ययेन निष्पन्नम् ॥ (धर्षणम् । यथा, महाभारते । ३ । ३१३ । २८ ।
"न चाप्यधर्म्मे न सुहृद्विभेदने
परस्वहारे परदारमर्षणे ।
कदर्य्यभावे च रमेन्मन: सदा
नृणां सदाख्यानमिदं विजानताम् ॥"
मर्षयतीति । मृष् + णिच् + ल्यु: । मर्षके, त्रि । यथा, श्रीमद्भागवते । ४ । ७ । ५८ ।
"इदं पवित्रं परमीशचेष्टितं
यशस्यमायुष्यमघौघमर्षणम् ।")

मर्षित:, त्रि, क्षमायुक्त: । क्षान्तिविशिष्ट: । मृषधातो: कर्त्तरि क्तप्रत्ययेन निष्पन्न: ॥ (यथा, श्रीमद्भागवते । १ । ७ । ५१ ।
"तत्राहामर्षितो भीमस्तस्य श्रेयान् वध: स्मृत: ।
न भर्त्तुर्नात्मनश्चार्थे योऽहन् सुप्तान् शिशून् वृथा ॥")
भावे क्तं, क्ली । (मर्षणम् ॥)

मर्षितवान्, त्रि, क्षान्त: । मृषधातो: कर्त्तरि क्तवतुप्रत्ययेन निष्पन्न: ॥

मल, ङ धृतौ । इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ मलते । इति दुर्गादास: ॥

मल:, पुं, क्ली, (मृज्यते शोध्यते इति । मृज् + "मृजेष्टिलोपश्च ।" उणा० १ । १०८ । इति कलच् टिलोपश्च । यद्वा, मलते धारयति व्याध्यादिदौर्गन्ध्यमिति । मल् + अच् ।) पापम् । (यथा, मनु: । २ । १०२ ।
"पश्चिमान्तु समासीनो मलं हन्ति दिवाकृतम् ॥"
"दिवार्ज्जितं पापं निहन्ति ।" इति तट्टीकायां कुल्लूकभट्ट: ॥ * ॥) विट् । (यथा, मनु: । ४ । २२० ।
"पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम् ।
विष्ठा वार्द्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् ॥"
"विष्ठा मलमेकमेव च ।" इति तद्भाष्ये मेधातिथि: ॥) किट्टम् । इत्यमर: । २ । ९ । ९५ ॥ (यथा, अभिज्ञानशकुन्तले । ६ ।
"छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा ॥")
"पापं किल्बिषम् । विट् । विष्ठा । किट्टं कलङ्को मण्डूरादि स्वेदादि च एषु मल: ।
'वसा शुक्रमसृङ्मज्जा मूत्रं विट्कर्णविण्नखा: ।
श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मला: ॥'
इति स्मृति: ।" इति तट्टीकायां भरत: ॥ कर्पूरम् । इति शब्दचन्द्रिका ॥ वातपित्तकफा: । यथा,—
"सर्व्वेषामेव रोगाणां निदानं कुपिता मला: ।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ॥"
इति माधवकर: ॥
(पारिभाषिकमलं यथा, महाभारते । ८ । ४५ । २३ ।
"क्षत्रियस्य मलं भैक्ष्यं ब्राह्मणस्यानृतं मलम् ।
मलं पृथिव्या वाहीका: स्त्रीणां मद्रस्त्रियो मलम् ॥")

मलघ्न:, पुं, (मलं हन्तीति । हन् + टक् ।) शाल्मलीकन्द: । इति राजनिर्घण्ट: ॥ मलनाशके, त्रि ॥

मलघ्नी, स्त्री, (मलघ्न + स्त्रियां ङीष् ।) नागदमनी । इति राजनिर्घण्ट: ॥

मलजं, क्ली, (मलाज्जायते इति । जन् + ड: ।) पूय: । इति शब्दचन्द्रिका ॥ मलोद्भवे, त्रि ॥

मलदूषितं, त्रि, (मलेन दूषितम् ।) मलिनम् । इत्यमर: । ३ । १ । ५५ ॥

मलद्रावी, [न्] पुं, (मलं विष्ठां द्रावयति चालयतीति । द्रु + णिच् + णिनि: ।) जयपाल: । इति राजनिर्घण्ट: ॥

मलनं, क्ली, (मल्यते मर्द्द्यते इति । मल् + ल्युट् ।) मर्द्दनम् । इति मेदिनी । ने, १०४ ॥

मलन:, पुं, (मलते धारयति दृष्टिताप्यौ । मल धृतौ + ल्यु: ।) पटवास: । इति मेदिनी । ने, १०४ । ताँबु इति भाषा ॥

मलपू:, स्त्री, (मलात् पापात् पुनातीति । पू + क्विप् ।) काकोडुम्बरिका । इत्यमर: । २ । ४ । ६१ ॥ (यथा, भावप्रकाशे ।
"विभीतकत्वं मलपूजटानां
क्वाथेन लत्वा गुड़संयुतेन ॥")

मलभुक्, [ज्] पुं, (मलं भुङ्क्ते इति । भुज् + क्विप् ।) काक: । इति शब्दरत्नावली ॥

मलभेदिनी, स्त्री, (मलं भिनत्तीति । भिद् + णिनि: । स्त्रियां ङीप् ।) कटुका । इति राजनिर्घण्ट: ॥

मलमास:, पुं, (मलो मलिनश्चासौ मासश्चेति कर्म्मधारय: ।) अधिकमास: । तत्पर्य्याय: ।